श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः
श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

# ॥ श्रीगरुडदण्डकः ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font.

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीगरुडदण्डकः ॥

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

नमः पन्नगनद्धाय वैकुण्ठवशवर्तिने।
श्रुतिसिन्धुसुधोत्पादमन्दराय गरुत्मते॥ १ ॥

गरुडमखिलवेदनीडाधिरूढं
द्विषत्पीडनोत्कण्ठिताकुण्ठवैकुण्ठपीठीकृतस्कन्धमीडे
स्वनीडागतिप्रीतरुद्रासुकीर्तिस्तनाभोगगाढोपगूढ
स्फुरत्कण्टकव्रात वेधव्यथावेपमान
द्विजिह्वाधिपाकल्पविष्फार्यमाण
स्फटावाटिका रत्नरोचिश्छटा राजिनीराजितं
कान्तिकल्लोलिनीराजितम्॥ २ ॥

जय गरुड सुपर्ण दर्वीकराहार देवाधिपाहारहारिन्
दिवौकस्पतिक्षिप्तदम्भोळिधाराकिणाकल्प
कल्पान्तवातूल कल्पोदयानल्प
वीरायितोद्यच्चमत्कार दैत्यारि
जैत्रध्वजारोहनिर्धारितोत्कर्ष
सङ्कर्षणात्मन् गरुत्मन्
मरुत्पञ्चकाधीश सत्यादिमूर्ते
न कश्चित् समस्ते नमस्ते पुनस्ते नमः॥ ३ ॥

नम इदमजहत्सपर्याय
पर्यायनिर्यातपक्षानिलास्फालनोद्वेलपाथोधि
वीचीचपेटाहतागाधपाताळभाङ्कारसङ्क्रुद्ध-
नागेन्द्रपीडासृणीभावभास्वन्नखश्रेणये

www.prapatti.com

चण्डतुण्डाय नृत्यद्भुजङ्गभ्रुवे वज्रिणे दंष्ट्रया
तुभ्यमध्यात्मविद्या विधेया विधेया
भवद्दास्यमापादयेथा दयेथाश्च मे॥ ४ ॥

मनुरनुगत पक्षिवक्त्र
स्फुरत्तारकस्तावकश्चित्रभानुप्रियाशेखरस्त्रायतां
नस्त्रिवर्गापवर्गप्रसूतिः परव्योमधामन्
वलद्वेषिदर्पज्वलद्वालखिल्यप्रतिज्ञावतीर्ण
स्थिरां तत्त्वबुद्धिं परां भक्तिधेनुं जगन्मूलकन्दे
मुकुन्दे महानन्ददोग्ध्रीं दधीथा
मुधाकामहीनामहीनामहीनान्तक॥ ५ ॥

षट्त्रिंशद्गणचरणो नरपरिपाटीनवीनगुम्भगणः।
विष्णुरथदण्डकोऽयं विघटयतु विपक्षवाहिनीव्यूहम्॥ ६ ॥

विचित्रसिद्धिदः सोऽयं वेङ्कटेशविपश्चिता।
गरुडध्वजतोषाय गीतो गरुडदण्डकः॥ ७ ॥

॥ इति श्रीगरुडदण्डकः समाप्तः ॥

कवितार्किकसिंहाय कल्याणगुणशालिने।
श्रीमते वेङ्कटेशाय वेदान्तगुरवे नमः॥

www.prapatti.com